# संस्कृतवार्ता:

दिनाङ्क : - 04/08/2025 सायम् : - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- भारत-फिलीपींस-राजनयिक-सम्बन्धानाम्-हीरक-जयन्ती-वर्षपूर्तिमुपलक्ष्य फिलीपींस - राष्ट्रपति: फर्डिनेंड आर. मार्कोस जूनियर भारतस्य पञ्च-दिवसीय-राजकीय-यात्रायाम् अद्य मध्याह्ने नव-दिल्लीम् अवाप्तोस्ति ।
- अद्य संसद: उभयो: सदनयोः कार्यान्वयनं पूर्ण-दिवसावधये जातं स्थगितम्।
- झारखंडस्य पूर्व-मुख्यमन्त्री शिबू-सोरेन: दिवंगत:। राष्ट्रपति-प्रधानमन्त्रि -समेतै: अन्य-नेतृभिश्च प्रकटिता: शोक-संवेदना:।
- शीर्ष-न्यायालयेन गलवान-उपत्यका-संघर्ष-प्रकरणे भारतीय-सैन्यबले विहित टिप्पणीम् अभिलक्ष्य अद्य कांग्रेस-दलस्य नेता राहुल-गान्धी तर्जित:, प्रोक्तं च यत् एतन्निभा: विषया: संसदि उत्थापनीया: न तु सामाजिक-संजालेषु।
- भारतीय-ऋतुविज्ञान-विभागेन उत्तर-प्रदेशं, उत्तराखण्डं च समेत्य देशस्य पूर्वीय-भागेषु अतिवृष्टेः अनुमान-पूर्वकं प्रकाशिता सुरक्षा-संचेतना ।
- क्रिकेट-क्रीडायां, भारतेन अद्य टेस्ट इति निकष-स्पर्धाया: अन्त्य-चक्रे षट् धावनाङ्कै: रोमाञ्चको विजयोऽधिगतः।

-------------------------------------

<u>फिलीपींस राष्ट्रपते: यात्रा:</u>

फिलीपींस-देशस्य राष्ट्रपति: फर्डिनेंड आर. मार्कोस जूनियर भारतस्य पञ्च-दिवसीय-राजकीय-यात्रायाम् अद्य मध्याह्ने नव-दिल्लीम् अवाप्तोस्ति। तेन साकं प्रथम महिला "लुईस-अरनेटा-मार्कोस"-सहितं एकम् उच्चस्तरीयं प्रतिनिधिमंडलमपि यात्रायां आगतम् अस्ति। यस्मिन् नैके

मन्त्रि-मण्डलीयाः मन्त्रिणः, अन्ये गणमान्याः जानाः, वरिष्ठाधिकारिणः, व्यापारिक प्रतिनिधयश्च समाविष्टाः वर्तन्ते। फिलीपींसस्य राष्ट्रपतेः पदभार-ग्रहणस्य अनन्तरं राष्ट्रपति-मार्कोसस्य एषा प्रथमा भारत-यात्रा वर्तते। अस्याः यात्रायाः अवसरे, प्रधानमन्त्री नरेन्द्र-मोदी, राष्ट्रपतिः मार्कोसश्च श्वः द्वै-पाक्षिकीं मन्त्रणां करिष्यतः। राष्ट्रपतिः मार्कोसः राष्ट्रपतिं द्रौपदी मुर्मू वर्याम् अपि सम्मिल्ल्य सम्भाषणम् आचरिष्यति। विदेश मन्त्री डॉ. एस. जयशंकरः अपि अस्याः यात्रायाः अवसरे राष्ट्रपतिना मार्कोस वर्येण समं मन्त्रणां करिष्यति। अत्रान्तरे एकस्मिन् वक्तव्ये, फिलीपींसस्य राष्ट्रपतिः भारतम् एकं महत्त्वपूर्णं मित्रराष्ट्रं प्रत्यपादयत्। श्री-मार्कोसः अस्मिन् विषये बलं प्रदत्तवान् यत् सामयिक-लोकतान्त्रिक-मूल्यानि, सामुद्रिकं हितं, क्षेत्रीय-शान्तिः, भारतेन साकं गहनो व्यापकः, सार्थकश्च द्विपक्षीय सहयोगः अपेक्ष्यते इति।

---

<u>संसत् स्थगनम्।</u>

संसदः उभयोः सदनयोः कार्यान्वयनं दिवसावधये जातं स्थगितम्। झारखंड मुक्ति मोर्चा दलस्य वरिष्ठ-नेत्रे वर्तमान-सांसदाय शिबू सोरेनाय श्रद्धाञ्जलि-प्रदानानन्तरं राज्यसभा स्थगितीकृता, यस्य अद्य प्रातः नव दिल्ल्यां निधनम् अभवत्, अपरत्र च बिहारे विशेष-गहन-पुनरीक्षणाभ्यासम् अवलम्ब्य विपक्षस्य विरोधकारणेन लोकसभायाः कार्यजातमपि जातं बाधितम्। अपराह्णे द्वि वादने पूर्व-स्थगनस्य पश्चात् यदा लोकसभायाः कार्यजातम् आरब्धं तदा, विपक्षि-दल सदस्याः बिहारस्य मतदातृ-सूच्याः विशेष-गहन-पुनरीक्षणाभ्यासे चर्चायै याच्ञा-पूर्वकं उद्घोषान् उच्चारयन्तः मध्येसदनम् आगताः। संसदीय-कार्य-मन्त्री किरेन-रिजिजूः विपक्षि-सांसदानां विरोधे रोषं प्रकटयन् प्रोक्तवान् यत् कार्य-मन्त्रणा-समितेः उपवेशने ऐषमो राष्ट्रिय-खेल-प्रशासन-विधेयके, पञ्च-दशोत्तर-द्वि-सहस्र-तमाब्दीये राष्ट्रिय डोपिंग-रोधि-संशोधन-विधेयके च चर्चा विधानस्य निर्णयः अभिस्वीकृतः आसीत्।

राज्यसभायां यदा सदनं प्रातः एकादश वादने समारब्धं तदा राज्यसभाया: उपसभापति: हरिवंश: उक्तवान् यत्, शिबू-सोरेन: एक: वरिष्ठ: प्रतिष्ठितश्च आदिवासी नेता आसीत्, येन आदिवासि-समुदायस्य अधिकार-रक्षार्थं, तेषाम् उत्थानार्थं च आंदोलने प्रमुख-भूमिका निर्व्यूढा आसीत्।

तदनु सदने सोरेनस्य सम्माने कतिपय-कालं यावत् मौनधारणं कृतम्। ततश्च दिवंगतस्य नेतु: निधने शोकम् व्यक्तीकृत्य, सदनस्य कार्यान्वयनम् पूर्ण दिवसावधये स्थगितीकृतम् अभूत्। झारखंडस्य पूर्व मुख्यमन्त्री वृक्काङ्गस्य रोगेण पीड़ित: आसीत् अथ च सार्धैक-मास-पूर्वं स: हृदयाघातेन अपि पीडितः। विगतैक-मासाद् असौ राजधान्यां सर गंगा राम चिकित्सालये जीवन-रक्षक-प्रणाल्याम् उपचाराधीन: आसीत्। राष्ट्रपति: द्रौपदी मुर्मू:, प्रधानमन्त्री नरेन्द्र मोदी अन्ये च गणमान्या: एतस्य वरिष्ठ-नेतु: निधनमभिलक्ष्य शोकं व्यक्तीकृतवन्त:। प्रधानमन्त्री मोदी दिवङ्गतात्मने श्रद्धांजलि-प्रदानार्थं चिकित्सालयस्य भ्रमणम् अपि कृतम् । झारखण्डे अद्यारभ्य अगस्त-षष्ठीं यावत् त्रि-दिवसीय: राजकीय: शोक: आमानयिष्यते। अद्य श्व: च सर्वेSपि सर्वकारीया: कार्यालया: पिहिता: स्थास्यन्ति।

----------------------------------------

<u>सर्वोच्चन्यायालय:-राहुल गांधी</u>

माननीय-सर्वोच्च-न्यायालयेन अद्य कांग्रेस-दलस्य नेत्रा राहुल-गान्धिना भारतीय-सैन्यबलं विरुध्य कथितानाम् अपमानजनक-वक्तव्यानां विषये असंतोष: प्रकटितः।

एतानि वक्तव्यानि विंशत्युत्तर-द्विसहस्र-तमे वर्षे भारतीय-सैन्यबलस्य चीनदेशेन सह गलवान्-उपत्यका-सङ्घर्षस्य सन्दर्भे आसन्। वादश्रवणावसरे सर्वोच्च न्यायालयेन मौखिक-टिप्पणीरूपेण राहुल-गान्धिन: वक्तव्यस्योपरि असंतोषः प्रकटितः। न्यायमूर्ति: दीपांकर-दत्ता, न्यायमूर्ति ए.जी. मसीह, इत्येतयोः न्यायपीठम: उक्तवान् यत् विपक्षस्य नेतारूपे सामाजिक-प्रसारण-पटले इदृशी चिंता नोपस्थापनीया अपितु एता-दृशा: विषय: संसदः पटले उपस्थापनीया: इति।

----------------------------------------

## भारतीय ऋतुविज्ञान-विभाग

भारतीय-ऋतुविज्ञान-विभागेन उत्तर-प्रदेशं, उत्तराखण्डं च समेत्य देशस्य पूर्वीय-भगेषु अतिवृष्टेः अनुमानं कृतमस्ति। ऋतुविज्ञान-विभागानुसारेण अद्य कर्णाटक, जम्मू-कश्मीर, लद्दाख, लक्ष्यद्वीप, मध्य प्रदेश, नागालैंड, मणिपुर, मिज़ोरम, त्रिपुरा, चेत्येतेषु राज्येषु अपि अतिवृष्टे: सम्भावना प्रकाशिता अस्ति। सहैव ऋतुविज्ञान-विभागेन तटवर्ती-आंध्रप्रदेशे, पश्चिम-बंगालस्य गंगातट-क्षेत्रे, जम्मू-कश्मीरे, झारखंडे, कर्णाटके, पश्चिमीय-मध्य-प्रदेशे च भूरिभागेषु तडित्प्रभापूर्वकं झञ्झावातेन सह वृष्टेः भविष्यवाणी अपि सम्प्रसारिता अस्ति।

--------------------------------------

## पश्चिम बंगाल सिक्किम:

पश्चिम-बंगालस्य कलिम्पोंग क्षेत्रेण साकं सिक्किम-प्रदेशस्य योजकः एनएच-10 इति रष्ट्रिय-राजमार्गः श्वः रात्रि कालात् आरभ्य अगस्त-मासस्य नवमं दिनांकं यावत् पिहित: भविष्यति। अतिवृष्टेः कारणात् कोरोनेशन ब्रिज इत्याख्ये राजमार्गीय-सेतौ अथ चित्रे इत्याख्ये स्थाने च यातायातं प्रभावितं जातमस्ति। भारवाहि-वाहनानां गमनागमनम् च अस्थायि -रूपेण प्रतिबंधितम् अस्ति।

--------------------------------------

## पी.आई.बी. तथ्यान्वेषणम्

पी.आई.बी. इति प्रेस-सूचना-ब्यूरो इत्यभिकरणस्य फैक्ट चेक यूनिट इति तथ्यान्वेषण-एकांशेन सोशल मीडिया इति सामाजिक सञ्जालेषु भारतस्य अमेरिका देशस्य च मध्ये सद्य एव टैरिफ इति शुल्क-सम्बद्ध-घटनाक्रम-विषये मृषापलाप-प्रसारण-रतासु मीडिया अकाउंट्स इति सञ्जालीय-लेखासु कार्यान्वायनं विहितम् अस्ति। एतासु लेखासु विदेशमन्त्रालयस्य नाम्ना अमेरिकीय-राष्ट्रपते: डोनाल्ड-ट्रम्पस्य नाम्ना च कपोल-कल्पित-वक्तव्य-प्रसारणस्य आरोपा: आरोपिता: सन्ति। तथ्यान्वेषण-एकांशेन उपयोगकर्तार: सञ्चेतिता: सन्ति यत्ते अन्तर्जाले प्रसारितानां मृषापलापनां मिथ्या-सूचनानां मुधा प्रचाराणां च विश्वासं नैव

कुर्युः। तथ्यान्वेषण-एकांशेन जना: परामृष्टा: यत्ते एतादृशीषु मुधापलाप-सामग्रीषु विश्वासात् पूर्वं आधिकारिक स्रोतसाम् अन्वीक्षणं नूनमेव विदध्यु:।

-------------------------------------

## क्रिकेट-क्रीडा

क्रिकेट-क्रीडायां, भारतेन अद्य टेस्ट इति निकष-स्पर्धाया: अन्त्य-चक्रे षट् धावनाङ्कै: रोमाञ्चको विजयोऽधिगतः।

एंडरसन-तेंदुलकर ट्रॉफीति स्पर्धायां इंग्लैंड-दलं विरुध्य लंदनस्य ओवल क्रीडाङ्गणे क्रीडिता पञ्च-स्पर्धा-शृङ्खला द्वि-द्वि-अङ्कै: समतायां अवस्थिता। तत्रैव इंग्लैंड-दलं पञ्चम-दिवसस्य स्वीये द्वितीये क्रीडा-पर्याये सप्त-षष्ट्युत्तर-त्रि-शत धावनाङ्कान् समर्ज्य बहिर्भूतम्। भारतेन दिनस्य आरम्भ: आक्रामक-रूपेण कृत:। मोहम्मद सिराज: क्रीडक-द्वयं बहिष्कृतवान् चेत् प्रसिद्ध-कृष्णेन च एकमपरम् अपि क्रीडकं बहिष्कृत्य स्पर्धाया: रोमांचकता वर्धिता। अन्ततो-गत्वा सिराज: एव अन्तिमं क्रीडकमपि बहि: कृतवान् ततः भारतेन स्पर्धा स्वायत्तीकृता। सिराज: भारतीय-दलस्य नायक: अभवत् येन स्पर्धायाम् आहत्य नव-क्रीडका: क्रीडात: बहिष्कृता:, येषु पञ्च तु द्वितीये पर्याये आसन्।

-------------------------------------

## अनिवार्य -घोषणा:

अद्य रात्रौ सार्ध-नववादने अस्माकं "पब्लिक् स्पीक्" इति द्विभाषीय-तात्कालिक-दूरभाष-कार्यक्रमे प्रियान्शु दिवान्, सहायक-आरक्षिदल-आयुक्त:, सायबर-अपराध गुरुग्राम-जनपदम्, अथ डा. पवन दुग्गल: सायबर-सुरक्षा-विशेषज्ञ: इत्येताभ्यां साकं अन्तरजालीय-वञ्चनया सुरक्षितं स्थातुं उपायान् विषये अन्तर्दृष्टिपूर्णं चर्चां करिष्यति। कार्यक्रमस्य समये श्रोतृभ्यः अन्तरजालीय-वञ्चनायाः परिचयः कथं करणीयः, कुत्र तस्य प्रतिवेदनं कर्तव्यं, एतादृशैः अपराधात् सुरक्षितं स्थातुं उपायः इत्येतैः सम्बद्धाः अस्मैः विशेषज्ञैः प्रश्नाः पृच्छितुं अवसरः भवति। कार्यक्रमे भागं ग्रहीतुं, अद्य रात्रौ सार्ध नववादनं आरभ्य दूरभाष-सङ्ख्याः शुन्यं,एकं,एकं-

द्वे,त्रिणि,सप्त,एकं,सप्त,एकं,एकं,सप्त तथा शुन्यं,एकं,एकं - द्वे,त्रिणि,त्रिणि,एकं,चत्वारि, चत्वारि, चत्वारि, चत्वारि प्रति संपर्कं करोतु।

।। इति वार्ता ।।